**SA-I**

विषय : संस्कृतम्

कक्षा : VIII

समय : होरात्रयम् पूर्णाङ्का : 80

निर्देशाः (1) *अस्मिन् प्रश्नपत्रे चत्वारः खण्डाः सन्ति।*

(2) *प्रतिखण्ड–उत्तराणि पृथक् प्रदत्तायाम् उत्तरपुस्तिकायां लेखनीयानि।*

(3) *प्रत्येकं खण्डं अधिकृत्य उत्तराणि एकस्मिन् स्थाने क्रमेण लेखनीयानि।*

(4) *प्रश्नपत्रे उत्तराणि न लेखनीयानि।*

(5) *प्रश्नसंख्या प्रश्नापत्रानुसारं अवश्यमेव लेखनीया।*

(6) *सर्वेषां प्रश्नानां उत्तराणि संस्कृतेन लेखनीयानि।*

**खण्डः 'क' (अपठित–अवबोधनम्)** अंकाः 10

प्र1. अधोलिखितम् अनुच्छेदम् पठित्वा प्रदत्तप्रश्नानां उत्तराणि लिखत -

स्वच्छं पर्यावरणम् अस्माकं जीवनस्य आधारः अस्ति। पुष्पिताः पल्लविताः वृक्षाः पर्यावरणस्य आधाराः भवन्ति। प्रत्येकप्राणी श्वसनक्रियायां प्राणवायुं गृह्णाति अपानवायोः च बहिः विसर्जनं करोति। वृक्षाणां श्वसनक्रिया तु मानवानां विपरीता अस्ति। अतः वृक्षैः पर्यावरणं शुद्धं भवति। वृक्षाः पर्यावरणं सन्तुलितं कुर्वन्ति। ते यथाकालं मेघानां वर्षणे सहायकाः भवन्ति। वृक्षाः भूमेः जलं गृह्णन्ति। अस्य जलस्य किञ्चित् भागं ते प्रयुज्यन्ते अवशिष्टं जलं च वाष्परूपेण पत्रेभ्यः बहिः निर्गच्छति। इदं जलं मेघानां निर्माणे सहायकं भवति। वृक्षाः पुष्पाणां फलानाम् औषधीनां च आगाराः सन्ति। वृक्षपादपानां हरीतिमा, तेषां पुष्पाणां शोभा पक्षिणां कलरवः च मानवानां कृते सुखदाः भवन्ति।

I. एकपदेन उत्तरत - (½x4=2)

(i) पुष्पिताः पल्लविताः वृक्षाः कस्य आधाराः भवन्ति?

(ii) अवशिष्टं जलं वाष्परूपेण केभ्यः बहिः निर्गच्छति?

(iii) स्वच्छं पर्यावरणं अस्माकं कस्य आधारः अस्ति?

(iv) के भूमेः जलं गृह्णन्ति?

II. पूर्णवाक्येन उत्तरत - (2x2=4)

(i) मानवानां कृते काः काः सुखदाः भवन्ति?

(ii) वृक्षाः केषाम् आगाराः सन्ति?

III. यथानिर्देशम् उत्तरत - (½x4=2)

(i) 'अवशिष्टं जलं' अनयोः पदयोः विशेष्यपदम् किम् अस्ति?

(ii) 'प्रत्येकप्राणी श्वसनक्रियायां प्राणवायुं गृह्णाति।' अत्र 'गृह्णाति' क्रियापदस्य कर्तृपदम् किम् अस्ति?

(iii) 'अशुद्धं' अस्य किम् विलोमपदम् अत्र प्रयुक्तम्?

(iv) 'खगानां' अस्य किं पर्यायपदम् अत्र प्रयुक्तम्?

IV. अस्य गद्यांशस्य कृते उचितं शीर्षकं लिखत। (2)

## खण्डः 'ख' (रचनात्मकं कार्यं) अंकाः 15

प्र2. मित्रं प्रति लिखितं निम्नलिखितं पत्रं मञ्जूषायां प्रदत्तैः पदैः पूरयित्वा पुनः उत्तरपुस्तिकायां लिखत - (5)

| मञ्जूषा |
|---|
| चतुर्वादने, सोमेश, कमलवत्, भवतः, आयोज्यते, प्रणामाः, नवदिल्लीतः, दिने, पितुः, अस्माकम् |

5, सोमविहार,

रामकृष्णपुरम्

(1)________

दिनांकः________

प्रिय मित्र (2)________।

सस्नेहं नमस्कारः।

अत्र सर्वं कुशलम्। मम (3)________ स्थानान्तरणं शिमलातः दिल्लीनगरे सञ्जातम्। (4)________ गृहं कमलमन्दिरस्य समीपे एव अस्ति। एतत् मन्दिरं (5)________ श्वेतपाषाणैः निर्मितम्। भवान् कस्मिचिद् (6)________ अत्र आगच्छतु। सायं (7)________ तत्र सर्वधर्मप्रार्थना (8)________ पितृचरेषु मम (9)________ निवेद्यन्ताम्।

(10)________ प्रियमित्रं

रविः

प्र3. निम्नचित्रं दृष्ट्वा मञ्जूषायां प्रदत्तशब्दानां सहायतया पञ्चसंस्कृतवाक्यानि लिखत - (2x5=10)

| मञ्जूषा |
|---|
| एका अध्यापिका, छात्राः, चित्रं, पाठयति, भित्तौ, फलके, श्यामपट्टे, शाटिका, संगणकयन्त्रम्, पुस्तकानि, समीपे, किञ्चित्, लिखितम् |



खण्डः 'ग' (अनुप्रयुक्त-व्याकरणम्) अंकाः 25

प्र4. अधोलिखितवाक्येषु रेखांकितपदानां सन्धिच्छेदं सन्धिं वा कृत्वा पुनः पूर्णवाक्यं लिखत - (1x4=4)

(i) परम+ईश्वरः संसारस्य रक्षकः अस्ति।

(ii) अस्य शुभ+आरम्भः कदा भविष्यति?

(iii) प्रत्येकम् कार्यम् ध्यानेन कुरु।

(iv) हितोपदेशः सुप्रसिद्धः कथासंग्रहः अस्ति।

प्र5. निम्न-उपसर्गान् धातून् च संयोज्य विभज्य वा लिखत - (1x4=4)

(i) सैनिकः चौरम् अनुगच्छति।

(ii) कपोतः आकाशे वि+चर्।

(iii) सूर्यः तमः अपनयति।

(iv) वृद्धः उद्याने परि+भ्रम्।

प्र6. (क) अधोलिखितवाक्ययोः रेखांकितपदस्य प्रकृति-प्रत्ययौ पृथक्-पृथक् कृत्वा अथवा संयोज्य पुनः वाक्यानि लिखत - (1x2=2)

(i) नरः कार्यं कर्तुम् गृहात् निर्गच्छति।

(ii) राजा धनं दा+तुमुन् मन्दिरं गच्छति।

(ख) तुमुन् प्रत्ययं संयोज्य वाक्यसंयोजनम् क्रियताम् - (1x2=2)

(i) गीता ईश्वरं नमति। सा देवालयं गच्छति।

(ii) सैनिकः देशं रक्षति। सः गच्छति।

प्र7. कोष्ठगतशब्देषु उचितविभक्तिं प्रयुज्य वाक्यानि उत्तरपुस्तिकायाम् लिखत - (1x4=4)

(i) __________ अधः एकः नरः अस्ति। (वृक्ष)

(ii) __________ परितः पुष्पाणि सन्ति। (गृह)

(iii) __________ सह पुत्रः अपि गच्छति। (जनक)

(iv) __________ मोहनः कुशलः अस्ति। (छात्र)

प्र8. उचितशब्दरूपैः रिक्तस्थानानि पूरयित्वा वाक्यानि पुनः लिखत - (1x4=4)

(i) एतानि पुस्तकानि __________ सन्ति। (अस्मद्)

(ii) सः __________ जलम् आनयति। (पितृ - चतुर्थी विभक्तिः, एकवचनम्)

(iii) सर्वे बालकाः __________ नमन्ति। (साधु - द्वितीया विभक्तिः)

(iv) __________ तत्र गत्वा उच्चैः श्लोकं पठसि। (युष्मद्)

प्र9. उचितधातुरूपैः रिक्तस्थानानि पूरयित्वा वाक्यानि पुनः लिखत - (1x5=5)

(i) ह्यः कक्षायाम् छात्रः एकं प्रश्नं __________। (प्रच्छ्)

(ii) ते हस्तौ प्रक्षाल्य भोजनं __________। (खाद् - विधिलिंग लकारे)

(iii) त्वं आश्रमं गत्वा मुनिं __________ । (नम् - लोट् लकारे)

(iv) कृषकाः क्षेत्रे कार्यं __________ । (कृ)

(v) श्वः वयम् फलानि __________ । (खाद्)

## खण्डः 'घ' (पठित–अवबोधनम्) अंकाः 30

प्र10. अधोलिखितम् गद्यांशम् पठित्वा प्रदत्तप्रश्नानां उत्तराणि लिखत - (5)

सिंहः अचिन्तयत् - "नूनम् एतस्यां गुहायां रात्रौ कोऽपि जीवः आगच्छति। अतः अत्रैव निगूढो भूत्वा तिष्ठामि" इति। एतस्मिन् अन्तरे गुहायाः स्वामी दधिपुच्छः नाम शृगालः समागच्छत्। स च यावत् पश्यति तावत् सिंहपदपद्धतिः गुहायां प्रविष्टा दृश्यते, न च बहिरागता। शृगालः अचिन्तयत् - "अहो विनष्टोऽस्मि। नूनम् अस्मिन् बिले सिंहः अस्तीति तर्कयामि तत् किं करवाणि?"

I. एकपदेन उत्तरत - (½x2=1)

(i) गुहायाः स्वामी कः आसीत्?

(ii) सिंहपदपद्धतिः कस्याम् प्रविष्टा दृश्यते?

II. पूर्णवाक्येन उत्तरत - (1x2=2)

(i) शृगालः किम् अचिन्तयत्?

(ii) गुहायां रात्रौ कः आगच्छति?

III. यथानिर्देशम् उत्तरत - (½x4=2)

(i) 'दिने' अस्य किम् विलोमपदम् अत्र प्रयुक्तम्?

(ii) 'तिष्ठामि' क्रियापदस्य कर्तृपदं किम् अस्ति?

(iii) 'एतस्यां गुहायां' अनयोः पदयोः विशेषणपदम् किम् अस्ति?

(iv) 'गुहायाम्' अस्य किम् पर्यायपदम् अत्र प्रयुक्तम्?

प्र11. अधोलिखितं पद्यांशं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि लिखत - (5)

गुणा गुणज्ञेषु गुणा भवन्ति
ते निर्गुणं प्राप्य भवन्ति दोषाः।
सुस्वादुतोयाः प्रभवन्ति नद्यः
समुद्रमासाद्य भवन्त्यपेयाः॥

I. एकपदेन उत्तरत - (½x2=1)

(i) कम् प्राप्य गुणाः दोषाः भवन्ति?

(ii) गुणाः कुत्र गुणाः भवन्ति?

II. पूर्णवाक्येन उत्तरत - (1x2=2)

(i) कम् आसाद्य नद्यः अपेयाः भवन्ति?

(ii) नद्यः कीदृशाः प्रभवन्ति?

III. यथानिर्देशम् उत्तरत - (½x4=2)

(i) 'गुणाः' अस्य कर्तृपदस्य क्रियापदं किम् अस्ति?

(ii) 'सागरम्' अस्य किं पर्यायपदम् अत्र प्रयुक्तम्?

(iii) 'सुस्वादुतोयाः नद्यः' अनयोः पदयोः विशेष्यपदम् किम् अस्ति?

(iv) 'दोषाः' अस्य किं विलोमपदम् अत्र प्रयुक्तम्?

प्र12. अधोलिखितं संवादम् पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि लिखत - (5)

अध्यापिका - प्रदेशेऽस्मिन् हस्तशिल्पानां बाहुल्यं वर्तते। आवस्त्राभूषणेभ्यः गृहनिर्माणपर्यन्तं प्रायः वंशवृक्षनिर्मितानां वस्तूनाम् उपयोगः क्रियते। यतो हि अत्र वंशवृक्षाणां प्राचुर्यं विद्यते। साम्प्रतं वंशोद्योगोऽयं अन्ताराष्ट्रियख्यातिम् अवाप्तोऽस्ति।

अभिनवः - भगिनीप्रदेशोऽयं बह्वाकर्षकः ज्ञायते?

सलीमः - किं भ्रमणाय भगिनीप्रदेशोऽयं समीचीनः?

सर्वे छात्राः - (उच्चैः) महोदये! आगामिनि अवकाशे वयं तत्रैव गन्तुम् इच्छामः।

स्वरा - भवत्यपि अस्माभिः सार्द्धं चलतु।

अध्यापिका - रोचते मेऽयं विचारः। एतानि राज्यानि तु भ्रमणार्थं स्वर्गसदृशानि इति।

I. एकपदेन उत्तरत - (½x2=1)

(i) अत्र केषां प्राचुर्यं विद्यते?

(ii) एतानि राज्यानि तु भ्रमणार्थं कीदृशानि सन्ति?

II. पूर्णवाक्येन उत्तरत - (1x2=2)

(i) सर्वे छात्राः कदा तत्र गन्तुम् इच्छन्ति?

(ii) सलीमः किं पृच्छति?

III. यथानिर्देशम् उत्तरत - (½x4=2)

(i) 'अधुना' अस्य किम् पर्यायपदम् अत्र प्रयुक्तम्?

(ii) 'अस्मिन् प्रदेशे' अनयोः पदयोः विशेषणपदम् किम् अस्ति?

(iii) 'आगन्तुम्' अस्य किं विलोमपदम् अत्र प्रयुक्तम्?

(iv) 'इच्छामः' अस्य क्रियापदस्य कर्तृपदम् किम् अस्ति?

प्र13. अधोलिखितश्लोकस्य अन्वयं उचितपदक्रमेण पूरयित्वा उत्तरपुस्तिकायां पुनः लिखत - (1x4=4)

पीत्वा रसं तु कटुकं मधुरं समानं
माधुर्यमेव जनयेन्मधुमक्षिकासौ।
सन्तस्तथैव समसज्जनदुर्जनानां
श्रुत्वा वचः मधुरसूक्तरसं सृजन्ति॥

अन्वयः - असौ मधुमक्षिका तु कटुकं (1)__________ रसं समानं (2)__________ माधुर्यम् एव जनयेत्। तथैव सन्तः समसज्जनदुर्जनानां (3)__________ श्रुत्वा मधुरसूक्तरसं (4)__________।

प्र14. अधोलिखितकथनेषु रेखांकितपदमाधृत्य प्रश्ननिर्माणं कुरुत - (1x4=4)

(1) व्याघ्रः बद्धः आसीत्।

(2) शिक्षिका गृहात् पुस्तकानि आदाय चलति।

(3) लोमशिका चञ्चलम् अकथयत्।

(4) मार्गे कश्चित् प्रस्तरखण्डान् क्षिपति।

प्र15. अधोलिखितवाक्यानि घटनाक्रमानुसारेण पुनः लिखत - (½x8=4)

(1) चञ्चलः नदीजलं वृक्षं च अपृच्छत्।

(2) चञ्चलः नाम व्याधः आसीत्।

(3) व्याघ्रः जाले अपतत् प्राणभिक्षाम् च अयाचत।

(4) एकदा तस्य जाले एकः व्याघ्रः बद्धः आसीत्।

(5) जाले बद्धं व्याघ्रं दृष्ट्वा प्रसन्नः चञ्चलः गृहं प्रत्यागच्छत्।

(6) व्याघ्रः अवदत् - अहं त्वां खादिष्यामि।

(7) चञ्चलः लोमशिकां सर्वां वार्तां कथयति।

(8) लोमशिका व्याघ्रम् कथयति - जाले पुनः प्राविशत्।

प्र16. अर्थैः सह शब्दानाम् मेलनं कृत्वा उत्तरपुस्तिकायाम् पुनः लिखत - (½x6=3)

| *शब्दाः* | *अर्थाः* |
|---|---|
| उपसृत्य | निरन्तरम् |
| समवायः | प्रयत्नम् |
| अनारतम् | समीपं गत्वा |
| प्रथितः | स्वभावः |
| प्रयासम् | प्रसिद्धः |
| प्रकृतिः | समूहः |